श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये पञ्चपञ्चाशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये पञ्चपञ्चाशं दशकम् ॥

## कालियमर्दने भगवन्नर्तनवर्णनम्

अथ वारिणि घोरतरं फणिनं
प्रतिवारयितुं कृतधीर्भगवन्।
द्रुतमारिथ तीरगनीपतरुं
विषमारुतशोषितपर्णचयम् ॥ 55.1 ॥

अधिरुह्य पदाम्बुरुहेण च तं
नवपल्लवतुल्यमनोज्ञरुचा।
ह्रदवारिणि दूरतरं न्यपतः
परिघूर्णितघोरतरङ्गगणे ॥ 55.2 ॥

भुवनत्रयभारभृतो भवतो
गुरुभारविकम्पिविजृम्भिजला।
परिमज्जयति स्म धनुश्शतकं
तटिनी झटिति स्फुटघोषवती ॥ 55.3 ॥

अथ दिक्षु विदिक्षु परिक्षुभित -
भ्रमितोदरवारिनिनादभरैः।
उदकादुदगादुरगाधिपति -
स्त्वदुपान्तमशान्तरुषाऽन्धमनाः ॥ 55.4 ॥

फणशृङ्गसहस्रविनिस्सृमर -
ज्वलदग्निकणोग्रविषाम्बुधरम्।

पुरतः फणिनं समलोकयथा
बहुशृङ्गिणमञ्जनशैलमिव ॥ **55.5** ॥

ज्वलदक्षि परिक्षरदुग्रविष -
श्वसनोष्मभरः स महाभुजगः।
परिदश्य भवन्तमनन्तबलं
परिवेष्टयदस्फुटचेष्टमहो ॥ **55.6** ॥

अविलोक्य भवन्तमथाकुलिते
तटगामिनि बालकधेनुगणे।
व्रजगेहतलेऽप्यनिमित्तशतं
समुदीक्ष्य गता यमुनां पशुपाः ॥ **55.7** ॥

अखिलेषु विभो भवदीयदशा -
मवलोक्य जिहासुषु जीवभरम्।
फणिबन्धनमाशु विमुच्य जवा -
दुदगम्यत हासजुषा भवता ॥ **55.8** ॥

अधिरुह्य ततः फणिराजफणान्
ननृते भवता मृदुपादरुचा।
कलशिञ्जितनूपुरमञ्जुमिल -
त्करकङ्कणसङ्कुलसङ्क्वणितम् ॥ **55.9** ॥

जहृषुः पशुपास्तुतुषुर्मुनयो
ववृषुः कुसुमानि सुरेन्द्रगणाः।
त्वयि नृत्यति मारुतगेहपते
परिपाहि स मां त्वमदान्तगदात् ॥ **55.10** ॥

॥ इति श्रीमन्नारायणीये पञ्चपञ्चाशं दशकं समाप्तम् ॥